# Shri Veda Vyasa Stotram 4 Daridryahara

# दारिद्र्यहर श्रीवेदव्यासस्तोत्रम् ४

## Document Information

Text title : Shri Veda Vyasa Stotram 4 Daridryahara

File name : vedavyAsastotram4dAridryahara.itx

Category : deities_misc, gurudev

Location : doc_deities_misc

Author : Yadavarya

Transliterated by : Krishnananda Achar

Proofread by : Krishnananda Achar

Latest update : May 15, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 31, 2020

*sanskritdocuments.org*

# दारिद्र्यहर श्रीवेदव्यासस्तोत्रम् ४

हा कृष्ण बदरीवासिन् क्वासि व्यास दयानिधे ॥

इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ १॥

हा सच्चिच्छुभद क्वासि तर्काभय विराजित ॥

इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ २॥

हा कीटराज्यसन्दायिन् क्वासि वाशिष्ठ वंशज ॥

इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ३॥

हा पाराशर्य सर्वेश क्वासि सत्यवतीसुत ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ४॥

हा तापस शिरोरत्न क्वासि देवेश तुष्टिमन् ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ५॥

हा विद्यामणि जन्माब्धे क्वासि द्वैपायनानघ ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ६॥

हा शुद्ध बुद्धिद क्वासि बादरायण सर्वदा ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ७॥

हा दुर्बुद्धितमः सूर्य क्वासि वेदविभाजक ।
इमामवस्थां संप्राप्तमनाथं किमुपेक्षसे ॥ ८॥

संसार काननेज्ञान द्वारकील सुदुःखितम् ।
दारिद्र्यदुस्सहावस्थमनाथं पाहिमां प्रभो ॥ ९॥

विषयासक्तचेतो वाक् शरीरं दोषदूषितम् ।
दारिद्र्यदुस्सहावस्थमनाथं पाहिमां प्रभो ॥ १०॥

शौतस्मार्तक्रियाभ्रष्टं बाह्यशौचविवर्जितम् ।

दारिद्र्यदुस्सहावस्थमनाथं पाहिमां प्रभो ॥ ११॥

दुर्दाना दानकर्तारं दुरन्ने निरतं सदा ।
दारिद्र्यदुस्सहावस्थमनाथं पाहिमां प्रभो । १२॥

परदाररतं नित्यं परनिन्दायुतं सदा ।
दारिद्र्यदुस्सहावस्थमनाथं पाहिमां प्रभो ॥ १३॥

आम्नायज्ञेयकायात्मन् भक्तभक्ति प्रकाशित ।
अमन्दानन्द मां व्यास कृपादृष्ट्या विलोकय ॥ १४॥

जननी वचन त्राण परायण गुणायन ।
अमन्दानन्द मां व्यास कृपादृष्ट्या विलोकय ॥ १५॥

अचक्षुः पूर्वजाभेद्य सञ्जयज्ञानदप्रभो ।
अमन्दानन्द मां व्यास कृपादृष्ट्या विलोकय ॥ १६॥

व्याख्याशक्तिप्रद श्रीद कविताप्रदमानद ।
अमन्दानन्द मां व्यास कृपादृष्ट्या विलोकय ॥ १७॥

ज्ञानदीपप्रभाभात ब्रह्माण्डान्तर्बहिः स्थित ॥

अमन्दानन्द मां व्यास कृपादृष्ट्या विलोकय ॥ १८॥

अशेषदोषदावाग्ने भवामय भिषङ्मणे ।
अमन्दानन्द मां व्यास कृपादृष्ट्या विलोकय ॥ १९॥

राकाधिपकराश्लेष हर्ष निर्दोषपूरुष ।
अमन्दानन्द मां व्यास कृपादृष्ट्या विलोकय ॥ २०॥

इमं मन्त्रं पठेद्यस्तु शतवारं गुरोः शुचिः ।
ददाति तस्य सम्पत्तिं शुकतातो न संशयः ॥ २१॥

इति श्रीयादवार्यकृतं दारिद्र्यहर श्रीवेदव्यासस्तोत्रं सम्पूर्णम् ॥

Encoded and proofread by Krishnananda Achar

*Shri Veda Vyasa Stotram 4 Daridryahara*

pdf was typeset on May 31, 2020

Please send corrections to *sanskrit@cheerful.com*